श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## चतुश्चत्वारिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## चतुश्चत्वारिंशः सर्गः

*प्रहस्तपुत्रस्य जम्बुमालिनो वधः*

सन्दिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली।
जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः॥ ५.४४.१ ॥

रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः।
महान् विवृत्तनयनश्चण्डः समरदुर्जयः॥ ५.४४.२ ॥

धनुः शक्रधनुः प्रख्यं महद् रुचिरसायकम्।
विस्फारयाणो वेगेन वज्राशनिसमस्वनम्॥ ५.४४.३ ॥

तस्य विस्फारघोषेण धनुषो महता दिशः।
प्रदिशश्च नभश्चैव सहसा समपूर्यत॥ ५.४४.४ ॥

रथेन खरयुक्तेन तमागतमुदीक्ष्य सः।
हनूमान् वेगसम्पन्नो जहर्ष च ननाद च॥ ५.४४.५ ॥

तं तोरणविटङ्कस्थं हनूमन्तं महाकपिम्।
जम्बुमाली महातेजा विव्याध निशितैः शरैः॥ ५.४४.६ ॥

अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना।
बाह्वोर्विव्याध नाराचैर्दशभिस्तु कपीश्वरम्॥ ५.४४.७ ॥

तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम्।
शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना॥ ५.४४.८ ॥

तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम्।
यथाऽऽकाशे महापद्मं सिक्तं काञ्चनबिन्दुभिः॥ ५.४४.९ ॥

www.prapatti.com

चुकोप बाणाभिहतो राक्षसस्य महाकपिः।
ततः पार्श्वेऽतिविपुलां ददर्श महतीं शिलाम्॥ ५.४४.१० ॥

तरसा तां समुत्पाट्य चिक्षेप जववद् बली।
तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः॥ ५.४४.११ ॥

विपन्नं कर्म तद् दृष्ट्वा हनूमांश्चण्डविक्रमः।
सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान्॥ ५.४४.१२ ॥

भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महाबलम्।
चिक्षेप सुबहून् बाणान् जम्बुमाली महाबलः॥ ५.४४.१३ ॥

सालं चतुर्भिश्चिच्छेद वानरं पञ्चभिर्भुजे।
उरस्येकेन बाणेन दशभिस्तु स्तनान्तरे॥ ५.४४.१४ ॥

स शरैः पूरिततनुः क्रोधेन महता वृतः।
तमेव परिघं गृह्य भ्रामयामास वेगतः॥ ५.४४.१५ ॥

अतिवेगोऽतिवेगेन भ्रामयित्वा बलोत्कटः।
परिघं पातयामास जम्बुमालेर्महोरसि॥ ५.४४.१६ ॥

तस्य चैव शिरो नास्ति न बाहू जानुनी न च।
न धनुर्न रथो नाश्वास्तत्रादृश्यन्त नेषवः॥ ५.४४.१७ ॥

स हतस्तरसा तेन जम्बुमाली महारथः।
पपात निहतो भूमौ चूर्णिताङ्ग इव द्रुमः॥ ५.४४.१८ ॥

जम्बुमालिं सुनिहतं किङ्करांश्च महाबलान्।
चुक्रोध रावणः श्रुत्वा कोपसंरक्तलोचनः॥ ५.४४.१९ ॥

स रोषसंवर्तितताम्रलोचनः प्रहस्तपुत्रे निहते महाबले।
अमात्यपुत्रानतिवीर्यविक्रमान् समादिदेशाशु निशाचरेश्वरः॥ ५.४४.२० ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः॥